यौयन्त्रमुख्यैश्च शतघ्नैश्च समावृतम्। गोपुरं सकपाटञ्च तत्र स्यात् सुमनोहरम्। सपताकगजारूढो येन राजा विशेत् पुरम्। चतस्रश्च तथा तत्र कार्य्यास्त्वायतवीथयः। एकस्मिंस्तत्र वीथ्यग्रे देववेश्म भवेद्दृढम्। वीथ्यग्रे च द्वितीये च राजवेश्म विधीयते। धर्म्माधिकरणं कार्य्यं वीथ्यग्रे च तृतीयके। चतुर्थे, त्वथ वीथ्यग्रे गोपुरञ्च विधीयते। आयतञ्चतुरस्रं वा वृत्तं वा कारयेत् पुरम्। मुक्तिहीनं त्रिकोणञ्च यवमध्यं तथैव च। आयतञ्चतुरस्रं वा वृत्तं वा कारयेत् पुरम्। अर्द्धचन्द्रं प्रशंसन्ति नदीतीरेषु तद्वसन्। अन्यत्तत्र न कर्त्तव्यं प्रयत्नेन विजानता। राज्ञा कोशगृहं कार्य्यं दक्षिणे राजवेश्मनः। तस्यापि दक्षिणे भागे गजस्थानं विधीयते। गजानां प्राङ्मुखी शाला कर्त्तव्या वाप्युदङ्मुखी। आग्नेये च तथा भागे आयुधागारमिष्यते। महानसञ्च धर्म्मज्ञ! कर्म्मशालास्तथापराः। गृहं पुरोधसः कार्य्यं वामतो राजवेश्मनः। मन्त्रिवेदविदाञ्चैव चिकित्साकर्त्तुरेव च। तत्रैव च तथा भागे कोषागारं विधीयते। गवां स्थानं तथैवात्र तुरगाणां तथैव च। उत्तराभिमुखी श्रेणी तुरगाणां विधीयते। दक्षिणाभिमुखी वाथ परिशिष्टास्तु गर्हिताः। तुरगास्ते तथा धार्य्याः प्रदीपैः सार्व्वरात्रिकैः। कुक्कुटान् वानरांश्चैव मर्कटांश्च विशेषतः। धारयेदश्वशालासु सवत्सां धेनुमेव च। अजाश्च धार्य्या यत्नेन तुरगाणां हितैषिणा। गोगजाश्वादिशालासु तत्पुरीषस्य निर्गमः। अस्तं गते न कर्त्तव्यो देवदेवे दिवाकरे। तत्र तत्र यथास्थानं राजा विज्ञाय सारतः। दद्यादावसथस्थानं सर्व्वेषामनुपूर्व्वशः। योधानां शिल्पिनाञ्चैव सर्व्वेषामविशेषतः। दद्यादावसथान् दुर्गे कालमन्त्रविदां शुभान्। गोवैद्यानश्ववैद्यांश्च गजवैद्यांस्तथैव च। आहरेत भृशं राजा दुर्गे हि प्रबला रुजः। कुशीलवानां विप्राणां दुर्गे स्थानं विधीयते। न बहूनामतो दुर्गे विना कार्य्यं तथा भवेत्। दुर्गे च तत्र कर्त्तव्या नानाप्रहरणान्विताः। सहस्रघातिनो राजंस्तैस्तु रक्षा विधीयते। दुर्गे द्वाराणि गुप्तानि कार्य्याण्यपि च भूभुजा। सञ्चयश्चात्र सर्व्वेषामायुधानां प्रशस्यते। धनुषां क्षेपणीयानां तोमराणां च पार्थिव!। शराणामथ खड्गानां कवचानां तथैव च। लगुडानां गुडानाञ्च हुडानां परिघैः सह। अश्मनाञ्च प्रभूतानां मुद्गराणां तथैव च। त्रिशूलानां पट्टिशानां कुठाराणाञ्च पार्थिव।! प्रासानाञ्च सशूलानां शक्तीनाञ्च नरोत्तम!। परश्वधानां चक्राणां वर्म्मणाञ्चर्म्मभिः सह। कुद्दालक्षुरवेत्राणां पीठकानान्तथैव च। तुषाणाञ्चैव दात्राणामङ्गाराणाञ्च सञ्चयः। सर्व्वेषां शिल्पिभाण्डानां सञ्चयश्चात्र चेष्यते। वादित्राणाञ्च सर्व्वेषामौषधीनान्तथैव च। यवसानां प्रभूतानामिन्धनस्य च सञ्चयः। गुडस्य सर्व्वतैलानां गोरसानान्तथैव च। वसानामथ मज्ज्ञानां स्नायूनामस्थिभिः सह। गोचर्म्मपटहानाञ्च धान्यानां सर्व्वतस्तथा। तथैवाभ्रपटानाञ्च यवगोधूमयोरपि। रत्नानां सर्व्ववस्त्राणां लोहानामप्यशेषतः। कलायमुद्गमाषाणाञ्चणकानां तिलैः सह। तथा च सर्व्वशस्यानां पांशुगोमययोरपि। शणसर्ज्जरसं भूर्ज्जं जतुलाक्षा च टङ्कणम्। राजा सञ्चिनुयाद्दुर्गे यच्चान्यदपि किञ्चन। कुम्भाश्चाशीविषैः कार्य्या व्यालसिंहादयस्तथा। मृगाश्च पक्षिणश्चैव रक्ष्यास्ते च परस्परम्। स्थानानि च विरुद्धानां सुगुप्तानि पृथक् पृथक्। कर्त्तव्यानि महाभाग! यत्नेन पृथिवीक्षिता। उक्तानि चाप्यनुक्तानि राजद्रव्याण्यशेषतः। सुगुप्तानि पुरे कुर्य्याज्जनानां हितकाम्यया। जीवकर्षभकाकोलमामलक्याटरूषकान्। शालपर्णी पृश्निपर्णी मुद्गपर्णी तथैव च। माषपर्णी मदौ द्वौ च सारिवे द्वे बलात्रयम्। वारा श्वसन्ती वृष्या च बृहती कण्टकारिका। शृङ्गी शृङ्गाटकी द्रोणी वर्षाभूर्द्दर्भरेणुका। मधुपर्णी विदार्य्यौ द्वे महाक्षीरा महातपाः। धन्वनः सहदेवाह्वा कटुकैरण्डकं विषः। पर्णी शताह्वा मृद्वीका फलगुखर्ज्जूरयष्टिकाः। शुक्रातिशुक्रकाश्मर्य्यं छत्रातिच्छत्रवीरणाः। इक्षुरिक्षुविकाराश्च फाणिताद्याश्च सत्तम!। सिंही च सहदेवी च विश्वेदेवाश्वरोधकम्। मधुकं पुष्पहंसाख्या शतपुष्पा मधूलिका। शतावरीमधूके च पिप्पलं तालमेव च। आत्मगुप्ता कट्फलाख्या दार्व्विका राजशीर्षकी। राजसर्षपधान्याकमृष्यप्रोक्ता तथोत्कटा। कालशाकं पद्मबीजं गोवल्ली मधुवल्लिका। शीतपाकी कुवेराक्षी काकजिह्वोड्पुष्पिका। पर्व्वतत्रपुसौ चोभौ गुञ्जातकपुनर्नवे। कसेरु काश्मीरी बल्या शालूककेसरम्। तुषधान्यानि सर्व्वाणि शमीधान्यानि चैव हि। क्षीरं क्षौद्रं तथा तक्रं तैलं मज्जा वसा घृतम्। नीपश्चारिष्टकाक्षोड़वातामसोमवाणकम्। एवमादीनि चान्यानि विज्ञेयो मधुरो गणः। राजा सञ्चिनुयात्सर्व्वं पुरे निरवशेषतः। दाड़िमाम्रातकौ चैव